३७

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।ऋतुदेवताः १-४ द्रविणोदा ऋतवश्च, ५ अश्विनौ ऋतवश्च, ६ अग्निः ऋतुश्च। जगती

**मन्दस्व होत्रादनु जोषमन्धसोऽध्वर्यवः स पूर्णां वष्ट्यासिचम्।**
**तस्मा एतं भरत तद्वशो ददिर्होत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ २.०३७.०१**

अध्वर्यवः- हे ध्वररहितकर्माणः। अन्धसः- रसस्य। जोषम्- प्रीतिम्। अनु। होत्रात्- मन्त्रविदः। होत्राशब्दो वाङ्नामसु पठितः। मन्दस्व। सः- असौ। पूर्णां- पूर्णम्। आसिचम्- रसम्। वष्टि- कामयते। तस्मै। एतम्- रसम्। भरत- वहत। तद्वशः- तत्कामः। ददिः- स युष्माकं दाता भवति। द्रविणोदः- सम्पद्दायक। सोमम्- रसम्। होत्रात्- मन्त्रविदः। ऋतुभिः- वसन्तादिकालैः। पिब- अनुभव ॥१॥

**यमु पूर्वमहुवे तमिदं हुवे सेदु हव्यो ददिर्यो नाम पत्यते।**
**अध्वर्युभिः प्रस्थितं सोम्यं मधु पोत्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ २.०३७.०२**

यम्। पूर्वम्। अहुवे- आहूतवान्। तम्। इदम्- इदानीमपि। हुवे- आह्वये। सः। इत्- एव। हव्यः- आह्वातव्यः। यः। नाम- खलु। पत्यते- ईष्टे। ददिः- स दाता भवति। अध्वर्युभिः- ध्वररहितकर्मकामैः। प्रस्थितम्- प्रस्थितः। सोम्यं मधु- रसः। पोत्रात्- पोतुः शोधकस्य रसस्य त्रातुः। सोमम्- रसम्। द्रविणोदः- सम्पद्दायक। ऋतुभिः- वसन्तादिकालैः। पिब- अनुभव ॥२॥

**मेद्यन्तु ते वह्नयो येभिरीयसेऽरिषण्यन्वीळयस्वा वनस्पते।**
**आयूर्या धृष्णो अभिगूर्या त्वं नेष्ट्रात्सोमं द्रविणोदः पिब ऋतुभिः॥ २.०३७.०३**

Dr. Rangaraj
WEBOLIM

येभिः- यैः। ईयसे- गच्छसि। ते- तव। वह्नयः- वोढारः। मेद्यन्तु- तृप्यन्तु। अरिषण्यन्- अहिंसन्। वीळयस्व- दृढीभव। धृष्णो- शत्रुधर्षक। आयूय- आगत्य। अभिगूर्य- उद्यम्य। त्वम्। नेष्ट्रात्- यज्ञनेतुः। सोमम्- रसम्। वनस्पते द्रविणोदः। ऋतुभिः पिब ॥३॥

**अपाद्धोत्रादुत पोत्रादमत्तोत नेष्ट्रादजुषत प्रयो हितम्।**
**तुरीयं पात्रममृक्तममर्त्यं द्रविणोदाः पिबतु द्राविणोदसः॥ २.०३७.०४**

होत्रात्- मन्त्रविदः। होत्राशब्दो वाङ्नामसु पठितः। अपात्- अपिबः। उत- अपि च। पोत्रात्- पोतुः शोधकस्य रसस्य त्रातुः। अमत्त- नन्दितवान्। नेष्ट्रात्- यज्ञनेतुः। हितम्- हितकरम्। प्रयः- रसम्। अजुषत- असेविष्ट। द्रविणोदाः- सम्पद्दायकः। द्राविणोदसः- सम्पद्दातृभ्यः। अमृक्तम्- अपरामृष्टम्। अमर्त्यं- अमृतम्। तुरीयम्- चतुर्थम्। पात्रम्- पानयोग्यमनुभवयोग्यं रसम्। पिबतु- अनुभवतु ॥४॥

**अर्वाञ्चमद्य यय्यं नृवाहणं रथं युञ्जाथामिह वां विमोचनम्।**
**पृङ्क्तं हवींषि मधुना हि कं गतमथा सोमं पिबतं वाजिनीवसू॥ २.०३७.०५**

यय्यम्- सरन्तम्। नृवाहणम्- नृणां वाहकम्। वाम्- युवयोः। विमोचनम्- विमोचकम्। रथम्- लक्ष्यप्रापकरंहणप्रतीकवाहनम्। रथी ऋतस्य नो भवेति श्रुतेः ऋतं रथः। अद्य- इदानीम्। इह- अत्र। युञ्जाथाम्। हवींषि- चरुपुरोडाशध्यानभावनादिहव्यानि। पृङ्क्तम्- सम्भक्तं कुरुतम्। मधुना- माधुर्येण। हि- खलु। कम्- सुखेन। गतम्- आगतम्। अथ- अनन्तरम्। वाजिनीवसू- अन्नवासकौ सन्तौ। सोमम्- रसम्। पिबतम्- अनुभवतम् ॥५॥

**जोष्यग्ने समिधं जोष्याहुतिं जोषि ब्रह्म जन्यं जोषि सुष्टुतिम्।**
**विश्वेभिर्विश्वाँ ऋतुना वसो मह उशन्देवाँ उशतः पायया हविः॥ २.०३७.०६**

Dr. Ranganji

WEBOLIM

अग्ने- पावक सर्वभूतहितकृतो। समिधम्। जोषि- सेवस्व। आहुतिम्- पुरोडाशादिकम्। जोषि। ब्रह्म- मन्त्रम्। जोषि। जन्यम्- सद्भावनम्। जोषि। सुष्टुतिम्- शोभनमन्त्रम्। जोषि। विश्वेभिः- सर्वैः। विश्वान्- सर्वान्। उशतः- कामयमानस्य। देवान्। महः- महतः। उशन्- कामयमानः। वसो- शरण्य। वस निवासे। ऋतुना- काले। हविः- रसम्। पायय- अनुभावय॥६॥

Dr. Ranganji

WEBOLIM